[1]तन्यमानः-तायमानः, तान्यमानः, तितनिष्यमाणः-तितांस्यमानः-तितंस्यमानः, तन्तन्यमानः ;

तानः-वितानः-सन्तानः, तानः, तितनिषः-तितांसः-तितंसः-तन्तनः ;

तनितुम्, तानयितुम्, तितनिषितुम्-तितांसितुम्-तितंसितुम्, तन्तनितुम् ;

ततिः[A] [2]विततिः-सन्ततिः, [3]तन्तिः, तानना, तितनिषा-तितांसा-तितंसा, तन्तना ;

तननम्, ताननम्, तितनिषणम्-तितांसनम्-तितंसनम्, तन्तननम् ;

[4]तनित्वा-तत्वा, तानयित्वा, तितनिषित्वा-तितांसित्वा-तितंसित्वा, तन्तनित्वा ;

[5]वितत्य,[B] प्रतान्य, प्रतितनिष्य-प्रतितांस्य-प्रतितंस्य, प्रतन्तन्य ;

तानम् २, तनित्वा२, तत्वा २, } तानम् २, तानयित्वा २, } तितनिषम् २- तितांसम् २- तितंसम् २, तितनिषित्वा २-तितांसित्वा २- तितंसित्वा२, } तन्तनम् २ ; तन्तनित्वा २. }

---

1. 'तनोतेर्यकि' (6-4-44) इति धातुनकारस्य आत्वविकल्पः। आत्वपक्षे सवर्णदीर्घे **तायमानः** इति भवति।

2. 'तितुत्र—' (7-2-9) इति इण्णिषेधः। नकारलोपः।

3. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिचि, 'तितुत्र—' (7-2-9) इतीण्णिषेधे, 'न क्तिचि दीर्घश्च' (6-4-39) इति दीर्घ-अनुनासिकलोपयोर्निषेधः।

4. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इडभावपक्षे अनुनासिकलोपः।

5. 'वा ल्यपि' (6-4-38) इत्यत्र व्यवस्थितविभाषाश्रयणात् **तनोत्यादीनां** नित्यमनुनासिकलोपः। **क्षीरस्वामी** तु व्यवस्थितविभाषामनाश्रित्य, **वितत्य, प्रतान्य** इति रूपद्वयमाह।

A. 'कृत्वा मारुतिलङ्घनोत्थितरयात् तत्रानुयात्रां ततः
पर्यायात् पतिता महेन्द्रगहनक्षोणीरुहाणां ततिः।' च. रा. 5. 2.

B. 'दृष्ट्वोर्णुवानान् ककुभो बलौघान् वितत्य शार्ङ्गं कवचं पिनह्य।' भ. का. 3. 47.